# श्री दुर्गाचंद्रकलास्तुतिः

वेधोहरीश्वरस्तुत्यां विहर्त्रीं विंध्यभूधरे ।
हरप्राणेश्वरीं वंदे हंत्रीं विबुधविद्विषाम् ॥ 1

अभ्यर्थनेन सरसीरुहसंभवस्य
त्यक्त्वोदिता भगवदक्षिपिधानलीलाम् ।
विश्वेश्वरी विपदपाकरणे पुरस्तात्
माता ममास्तु मधुकैटभयोर्निहंत्री ॥ 2

प्राङ्निर्जरेषु निहतैर्निजशक्तिलेशैः
एकीभवद्भिरुदिताऽखिललोकगुप्त्यै ।
सम्पन्नशस्त्रनिकरा च तदायुधस्थैः
माता ममास्तुमहिषान्तकरी पुरस्तात् ॥ 3

प्रालेयशैलतनया तनुकान्तिसंपत्
कोशोदिता कुवलयच्छविचारुदेहा ।
नारायणी नमदभीप्सितकल्पवल्ली
सुप्रीतिमावहतु शुंभनिशुंभहंत्री ॥ 4

विश्वेश्वरीति महिषान्तकरीति यस्याः
नारायणीत्यपि च नामभिरंकितानि ।

© 2022 Vedam Nadam

सूक्तानि पंकजभुवा च सुरर्षिभिश्च
दृष्टानि पावकमुखैश्च शिवां भजे ताम् ॥ 5

उत्पत्तिदैत्यहननस्तवनात्मकानि
संरक्षकाण्यखिलभूतहिताय यस्याः ।
सूक्तान्यशेषनिगमांतविदः पठंति
तां विश्वमातरमजस्रमभिष्टवीमि ॥ 6

ये वैप्रचित्तपुनरुत्थितशुंभमुख्यैः
दुर्भिक्षघोरसमयेन च कारितासु ।
आविष्कृतास्त्रिजगदार्तिषु रूपभेदाः
तैरंबिका समभिरक्षतु मां विपद्भ्यः ॥ 7

सूक्तं यदीयमरविन्दभवादि दृष्टं
आवर्त्य देव्यनुपदं सुरथः समाधिः ।
द्वावप्यवापतुरभीष्टमनन्यलभ्यं
तामादिदेवतरुणीं प्रणमामि मूर्ध्ना ॥ 8

माहिष्मतीतनुभवं च रुरुं च हन्तुं
आविष्कृतैर्निजरसादवतारभेदैः ।
अष्टादशाहतनवाहतकोटिसंख्यैः
अंबा सदा समभिरक्षतु मां विपद्भ्यः ॥ 9

© 2022 Vedam Nadam

एतच्चरित्रमखिलं लिखितं हि यस्याः
संपूजितं सदन एव निवेशितं वा ।
दुर्गं च तारयति दुस्तरमप्यशेषं
श्रेयः प्रयच्छति च सर्वमुमां भजेताम् ॥ 10

यत्पूजनस्तुतिनमस्कृतिभिर्भवंति
प्रीताः पितामह रमेशहरास्त्रयोऽपि ।
तेषामपि स्वकगुणैर्ददतीं वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये ॥ 11

कांतारमध्यदृढलग्नतयाऽवसन्नाः
मग्नाश्चवारिधिजले रिपुभिश्च रुद्धाः ।
यस्याः प्रपद्य चरणौ विपदस्तरन्ति
सा मे सदाऽस्तुहृदि सर्वजगत्सवित्री ॥ 12

बंधे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे य महोपतापे ।
यत्पादपूजनमिह प्रतिकारमाहुः
सा मे समस्तजननी शरणं भवानी ॥ 13

बाणासुरप्रहितपन्नगबंधमोक्षः
तद्बाहुदर्पदलनादुषया च योगः ।

© 2022 Vedam Nadam

प्राद्युम्निना द्रुतमलभ्यत यत्प्रसादात्
सा मे शिवा सकलमप्यशुभं क्षिणोतु ॥ 14

पापः पुलस्त्यतनयः पुनरुत्थितो मां
अद्यापि हर्तुमयमागत इत्युदीतम् ।
यत्सेवनेन भयमिन्दिरयाऽवधूतं
तामादिदेवतरुणीं शरणं गतोऽस्मि ॥ 15

यद्ध्यानजं सुखमवाप्यमनंतपुण्यैः
साक्षात्तमच्युत परिग्रहमाश्ववापुः ।
गोपांगनाः किल यदर्चन पुण्यमात्राः
सा मे सदा भगवती भवतु प्रसन्ना ॥ 16

रात्रिं प्रपद्य इति मंत्रविदः प्रपन्नान्
उद्बोध्य मृत्यवधिमन्यफलैः प्रलोभ्य ।
बुद्ध्वा च तद्विमुखतां प्रतनं नयन्तीं
आकाशमादिजननीं जगतां भजे ताम् ॥ 17

देशकालेषु दुष्टेषु दुर्गाचन्द्रकलास्तुतिः ।
सन्ध्ययोरनुसंधेया सर्वापद्विनिवृत्तये ॥ 18

॥ इति श्रीमदपय्यदीक्षितविरचिता दुर्गाचन्द्रकलास्तुतिः संपूर्णम् ॥

© 2022 Vedam Nadam